# श्रीशङ्कराचार्य-अष्टोत्तरशतनामादि

**(२०१८)**

**श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्**

**दक्षिणाम्नाय श्रीशारदापीठम् , शृङ्गगिरिः**

# Sri Shankaracharya Ashtottara Shatanamaadi - Devanagari

Published by &
Printed at : Vidya Bharati Press
(An inhouse publication wing of
Sringeri Sri Sharada Peetham, Karnataka
Ph: 080-23211168)

First Edition : December 2017, Copies : 2000

Copyright : Dakshinamnaya Sri Sharada Peetham,Sringeri

Contribution Value : ₹ 10/-

Copies Available at : Dakshinamnaya Sri Sharada Peetham, Sringeri

Email : publications@sringeri.net

# Benedictory Message of Sri Sannidhanam

Lord Parameshwara incarnated as Sri Adi Shankara Bhagavatpada in this Kali Yuga in accordance to the statement in the Bhagavad Gita - "I descend in every Yuga for protecting Dharma and uprooting Adharma" (यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ )

Sri Adi Shankara Bhagavatpada dispelled non-Vedic creeds, revived our Sanatana Vaidika Dharma, propagated it and ensured that the masses engage in a Dharmic way of life. The service Bhagavatpada has rendered is extraordinary. If we are able to adhere to Dharma to the extent possible, and attain a sense of fulfilment, it is solely due to the efforts of Bhagavatpada. All astikas are ever indebted to Bhagavatpada, who is worthy of our worship.

As the remembrance and worship of Bhagavatpada would be beneficial to us, Our Guru, the Peethadhipati of Dakshinamnaya Sri Sharada Peetham at Sringeri, Jagadguru Shankaracharya Sri Sri Bharati Tirtha Mahaswamiji has blessed the commencement of "Sri Shankaracharya Ashtottara Shatanama Parayana Ya-

jna". The objective of this Parayana Yajna is the welfare of every individual brought about by means of the mass chanting of the Ashtottara Shatanamavali (108 Names) of Sri Adi Shankara Bhagavatpadacharya.

Divine Names have immense power. That is why we have the practice of chanting 24 names, 108 names, Trishati (300 names), Sahasranama (1000 names) as part of our worship. The power of even a single Divine name removes all sins as outlined in the scriptures - **"एकस्य नाम्नो या शक्तिः पातकानां निवर्तने । तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥"**

There need be no doubt that we will be benefitted if we were to chant this Ashtottara Shatanama with utmost faith and devotion. May everyone participate in the Yajna accordingly and attain Shreyas.

# Foreword

Twelve centuries ago, Lord Paramashiva incarnated as Jagadguru Sri Adi Shankaracharya and spread the Upanishadic import of Advaita touring all over the country. Today we are followers of Sanatana Dharma only because of the relentless efforts of the Acharya. With great foresight, Sri Adi Shankaracharya established four Amnaya Peethams in the four directions of India. Among these, the Dakshinamnaya Sri Sharada Peetham established at Sringeri has been adorned by an unbroken succession of illustrious Acharyas, right from Sri Adi Shankaracharya's direct disciple, Sri Sureshwaracharya. The Acharyas have been leading a life of great austerity while undertaking their efforts to continue the mission of Sri Adi Shankaracharya. By their own conduct and by their discourses, the Acharyas of the Peetham teach Dharma and instil the need for paying gratitude to Sri Adi Shankaracharya among the masses.

With the blessings of Jagadguru Shankaracharya Sri Sri Bharati Tirtha Mahasannidhanam (presiding Acharya of the Peetham), and Jagadguru Sri Vidhushekhara Bharati Sannidhanam, Sri Adi Shankaracharya Ashtottara

Shatanama Parayana Yajna is being conducted in Karnataka, Tamil Nadu, Andhra Pradesh, Telangana and Kerala.

I request all devotees to participate in this Parayana Yajna and be the recipient of the benign blessings of Jagadguru Sri Adi Shankaracharya & Sri Mahasannidhanam and Sri Sannidhanam.

Gurusevadhurina
Dr. V R Gowrishankar
Administrator and CEO
Sri Sharada Peetham, Sringeri

# एकश्लोकी

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥

# श्रीगुरुवन्दनम्

शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।
किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥ १ ॥

प्रह्लादवरदो देवो यो नृसिंहः परो हरिः ।
नृसिंहोपासकं नित्यं तं नृसिंहगुरुं भजे ॥ २ ॥

श्रीसच्चिदानन्द-शिवाभिनवनृसिंहभारत्यभिधान् यतीन्द्रान् ।
विद्यानिधीन् मन्त्रनिधीन् सदात्मनिष्ठान् भजे मानवशम्भुरूपान् ॥ ३ ॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥ ४ ॥

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥ ५ ॥

अज्ञानां जाह्नवीतीर्थं विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥ ६ ॥

विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥ ७ ॥

# बिरुदावलिः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-

पदवाक्यप्रमाणपारावारपारीण-यमनियमासन-

प्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ-

तपश्चक्रवर्ति-अनाद्यविच्छिन्नश्रीशङ्कराचार्यगुरुपरम्पराप्राप्त-

षड्दर्शनस्थापनाचार्य-व्याख्यानसिंहासनाधीश्वर-

सकलनिगमागमसारहृदय-

साङ्ख्यत्रयप्रतिपादक-वैदिकमार्गप्रवर्तक-सर्वतन्त्रस्वतन्त्र-

आदिराजधानी-विद्यानगरमहाराजधानी-

कर्णाटकसिंहासनप्रतिष्ठापनाचार्य-श्रीमद्राजाधिराजगुरु-
भूमण्डलाचार्य-ऋष्यशृङ्गपुरवराधीश्वर-तुङ्गभद्रातीरवासि-
श्रीमद्विद्याशङ्करपादपद्माराधक-
श्रीमज्जगद्गुरु-श्रीमदभिनवविद्यातीर्थमहास्वामिगुरुकरकमलसञ्जात-
श्रीमज्जगद्गुरु-श्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जात-
श्रीमज्जगद्गुरु-श्रीविधुशेखरभारती-महास्वामिनाञ्च
चरणारविन्दयोः साष्टाङ्गप्रणामान् समर्पयामः ॥

# गणेशस्तुतिः

सदा बालरूपापि विघ्नाद्रिहन्त्री
महादन्तिवक्त्रापि पञ्चास्यमान्या ।
विधीन्द्रादिमृग्या गणेशाभिधा मे
विधत्तां श्रियं कापि कल्याणमूर्तिः ॥

# श्रीशारदावर्णमालास्तवः

श्रीशिवापूज्यपादाब्जा श्रीकन्धरसहोदरी ।
श्रीधुतस्फटिका भूयात् श्रियै मे शारदाऽनिशम् ॥ १ ॥

शारदाभ्रसदृग्वस्त्रां नीलनीरदकुन्तलाम् ।
पारदां दुःखवाराशेः शारदां सततं भजे ॥ २ ॥

रत्नचित्रितभूषाढ्यां प्रत्नवाक्स्तुतवैभवाम् ।
नूत्नसारस्यदां वाणीं कृत्स्नज्ञानाप्तये स्तुमः ॥ ३ ॥

दाडिमीबीजरदनां दान्त्यादिगुणदायिनीम् ।
दानधिक्कृतकल्पद्रुं दासोऽहं नौमि शारदाम् ॥ ४ ॥

यैः सदा पूजिता ध्याता यैषा श्रृङ्गपुरस्थिता ।
शारदाम्बा लोकपूज्याः त एव हि नरोत्तमाः ॥ ५ ॥

नमत्सुरी–कैश्य–गन्धलुब्ध–भ्रमर–राजितम् ।
नतेष्टदानसुरभिं वाणीपादाम्बुजं स्तुमः ॥ ६ ॥

मस्तराजच्चन्द्रलेखा पुस्तशोभिकराम्बुजा ।
त्रस्तैणनयना वाणी ध्वस्ताघं मां तनोत्वरम् ॥ ७ ॥

शारदा-पादसरसीरुहसंसक्त-चेतसा ।
यतिना रचितं स्तोत्रं पठतां शिवदायकम् ॥ ८ ॥

# श्रीशङ्करभगवत्पादाचार्यस्तवः

मुदा करेण पुस्तकं दधानमीशरूपिणं
तथाऽपरेण मुद्रिकां नमत्तमोविनाशिनीम् ।
कुसुम्भवाससावृतं विभूतिभासिफालकं
नताघनाशने रतं नमामि शङ्करं गुरुम् ॥ १ ॥

पराशरात्मजप्रियं पवित्रितक्षमातलं
पुराणसारवेदिनं सनन्दनादिसेवितम् ।
प्रसन्नवक्त्रपङ्कजं प्रपन्नलोकरक्षकं
प्रकाशिताद्वितीयतत्त्वमाश्रयामि देशिकम् ॥ २ ॥

सुधांशुशेखरार्चकं सुधीन्द्रसेव्यपादुकं
सुतादिमोहनाशकं सुशान्तिदान्तिदायकम् ।
समस्तवेदपारगं सहस्रसूर्यभासुरं
समाहिताखिलेन्द्रियं सदा भजामि शङ्करम् ॥ ३ ॥

यमीन्द्रचक्रवर्तिनं यमादियोगवेदिनं
यथार्थतत्त्वबोधकं यमान्तकात्मजार्चकम् ।
यमेव मुक्तिकाङ्क्षया समाश्रयन्ति सज्जनाः
नमाम्यहं सदा गुरुं तमेव शङ्कराभिधम् ॥ ४ ॥

स्वबाल्य एव निर्भरं य आत्मनो दयालुतां
दरिद्रविप्रमन्दिरे सुवर्णवृष्टिमानयन् ।
प्रदर्श्य विस्मयाम्बुधौ न्यमज्जयत्समाञ्जनान्
स एव शङ्करस्सदा जगद्गुरुर्गतिर्मम ॥ ५ ॥

यदीयपुण्यजन्मना प्रसिद्धिमाप कालटी
यदीयशिष्यतां व्रजन् स तोटकोऽपि पप्रथे ।
य एव सर्वदेहिनां विमुक्तिमार्गदर्शकः
नराकृतिं सदाशिवं तमाश्रयामि सद्गुरुम् ॥ ६ ॥

सनातनस्य वर्त्मनः सदैव पालनाय यः

चतुर्दिशासु सन्मठान् चकार लोकविश्रुतान् ।

विभाण्डकात्मजाश्रमादिसुस्थलेषु पावनान्

तमेव लोकशङ्करं नमामि शङ्करं गुरुम् ॥ ७ ॥

यदीयहस्तवारिजातसुप्रतिष्ठिता सती

प्रसिद्धशृङ्गभूधरे सदा प्रशान्तिभासुरे ।

स्वभक्तपालनव्रता विराजते हि शारदा

स शङ्करः कृपानिधिः करोतु मामनेनसम् ॥ ८ ॥

इमं स्तवं जगद्गुरोर्गुणानुवर्णनात्मकं

समादरेण यः पठेदनन्यभक्तिसंयुतः ।

समाप्नुयात्समीहितं मनोरथं नरोऽचिरात्

दयानिधेस्स शङ्करस्य सद्गुरोः प्रसादतः ॥ ९ ॥

अवतीर्णश्च कालट्यां केदारेऽन्तर्हितश्च यः ।
चतुष्पीठप्रतिष्ठाता जयताच्छङ्करो गुरुः ॥

# एकश्लोकी शङ्करदिग्विजयः

आर्याम्बाजठरे जनिर्द्विजसतीदारिद्र्य निर्मूलनं
संन्यासाश्रयणं गुरूपसदनं श्रीमण्डनादेर्जयः ।
शिष्यौघग्रहणं सुभाष्यरचनं सर्वज्ञपीठाश्रयः
पीठानां रचनेति सङ्ग्रहमयी सैषा कथा शाङ्करी ॥

# सङ्कल्पः

ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं
सर्वेषां आस्तिकमहाजनानां क्षेमस्थैर्य-वीर्यविजय-अभय-
आयुरारोग्य-ऐश्वर्याभिवृद्ध्यर्थं, समस्त-दुरितोपशान्त्यर्थं,
समस्त-मङ्गलावाप्त्यर्थं, समस्त-अभ्युदयार्थं च,
धर्मार्थ-काममोक्षाख्य-चतुर्विधपुरुषार्थसिद्ध्यर्थं,
श्रीमच्छङ्करभगवत्पादाचार्याख्य-सद्गुरुप्रसादसिद्ध्यर्थं,
श्रीसद्गुरुप्रसादेन सर्वेषां आस्तिकमहाजनानां सद्विद्या-
सद्बुद्धिप्राप्त्यर्थं, चित्तशान्ति-सुखसन्तोषाद्यभिवृद्ध्यर्थं,
देशोपप्लवनिवृत्त्यर्थं, श्रीमच्छङ्करभगवत्पादाचार्य-प्रीत्यर्थं
श्रीमच्छङ्करभगवत्पादाचार्य-अष्टोत्तर-शतनाम-पारायणं करिष्ये ॥

# श्रीशङ्करभगवत्पादाचार्य-अष्टोत्तरशतनामावलिः

श्रीशङ्कराचार्यवर्याय नमः

ब्रह्मानन्दप्रदायकाय नमः

अज्ञानतिमिरादित्याय नमः

सुज्ञानाम्बुधिचन्द्रमसे नमः

वर्णाश्रमप्रतिष्ठात्रे नमः

श्रीमते नमः

मुक्तिप्रदायकाय नमः

शिष्योपदेशनिरताय नमः

भक्ताभीष्टप्रदायकाय नमः

सूक्ष्म तत्त्वरहस्यज्ञाय नमः १०

कार्याकार्यप्रबोधकाय नमः

ज्ञानमुद्राञ्चितकराय नमः

शिष्यहृत्तापहारकाय नमः

परिव्राजाश्रमोद्धर्त्रे नमः

सर्वतन्त्रस्वतन्त्रधिये नमः

अद्वैतस्थापनाचार्याय नमः

साक्षाच्छङ्कररूपधृते नमः

षण्मतस्थापनाचार्याय नमः

त्रयीमार्गप्रकाशकाय नमः

वेदवेदान्ततत्त्वज्ञाय नमः २०

दुर्वादिमतखण्डनाय नमः

वैराग्यनिरताय नमः

शान्ताय नमः

संसारार्णवतारकाय नमः

प्रसन्नवदनाम्भोजाय नमः

परमार्थप्रकाशकाय नमः

पुराणस्मृतिसारज्ञाय नमः

नित्यतृप्ताय नमः

महते नमः

शुचये नमः ३०

नित्यानन्दाय नमः

निरातङ्काय नमः

निस्सङ्गाय नमः

निर्मलात्मकाय नमः

निर्ममाय नमः

निरहङ्काराय नमः

विश्ववन्द्यपदाम्बुजाय नमः

सत्त्वप्रधानाय नमः

सद्भावाय नमः

सङ्ख्यातीतगुणोज्ज्वलाय नमः ४०

अनघाय नमः

सारहृदयाय नमः

सुधिये नमः

सारस्वतप्रदाय नमः

सत्यात्मने नमः

पुण्यशीलाय नमः

साङ्ख्ययोगविचक्षणाय नमः

तपोराशये नमः

महातेजसे नमः

गुणत्रयविभागविदे नमः ५०

कलिघ्नाय नमः

कालकर्मज्ञाय नमः

तमोगुणनिवारकाय नमः

भगवते नमः

भारतीजेत्रे नमः ५५

शारदाह्वानपण्डिताय नमः

धर्माधर्मविभागज्ञाय नमः

लक्ष्यभेदप्रदर्शकाय नमः

नादबिन्दुकलाभिज्ञाय नमः

योगिहृत्पद्मभास्कराय नमः ६०

अतीन्द्रियज्ञाननिधये नमः

नित्यानित्यविवेकवते नमः

चिदानन्दाय नमः

चिन्मयात्मने नमः

परकायप्रवेशकृते नमः

अमानुषचरित्राढ्याय नमः

क्षेमदायिने नमः

क्षमाकराय नमः

भव्याय नमः

भद्रप्रदाय नमः ७०

भूरिमहिम्ने नमः

विश्वरञ्जकाय नमः

स्वप्रकाशाय नमः

सदाधाराय नमः

विश्वबन्धवे नमः

शुभोदयाय नमः

विशालकीर्तये नमः

वागीशाय नमः

सर्वलोकहितोत्सुकाय नमः

कैलासयात्रा-सम्प्राप्त-चन्द्रमौलि-प्रपूजकाय नमः ८०

काञ्च्यां श्रीचक्रराजाख्य-यन्त्रस्थापन-दीक्षिताय नमः

श्रीचक्रात्मक-ताटङ्क-तोषिताम्बा-मनोरथाय नमः

श्रीब्रह्मसूत्रोपनिषद्भाष्यादि-ग्रन्थकल्पकाय नमः

चतुर्दिक्चतुराम्नाय-प्रतिष्ठात्रे नमः

महामतये नमः

द्विसप्ततिमतोच्छेत्रे नमः

सर्वदिग्विजयप्रभवे नमः

काषायवसनोपेताय नमः

भस्मोद्धूलितविग्रहाय नमः

ज्ञानात्मकैकदण्डाढ्याय नमः ९०

कमण्डलुलसत्कराय नमः

गुरुभूमण्डलाचार्याय नमः

भगवत्पादसञ्ज्ञकाय नमः

व्याससन्दर्शनप्रीताय नमः

ऋष्यश्रृङ्गपुरेश्वराय नमः

सौन्दर्यलहरीमुख्य-बहुस्तोत्र-विधायकाय नमः

चतुष्षष्टिकलाभिज्ञाय नमः

ब्रह्मराक्षसमोक्षदाय नमः

श्रीमन्मण्डनमिश्राख्य-स्वयम्भूजय-सन्नुताय नमः

तोटकाचार्यसम्पूज्याय नमः १००

पद्मपादार्चिताङ्घ्रिकाय नमः

हस्तामलक-योगीन्द्र-ब्रह्मज्ञान-प्रदायकाय नमः

सुरेश्वराख्य-सच्छिष्य-सन्न्यासाश्रमदायकाय नमः

नृसिंहभक्ताय नमः

सद्रत्नगर्भहेरम्ब-पूजकाय नमः

व्याख्यासिंहासनाधीशाय नमः

जगत्पूज्याय नमः

जगद्गुरवे नमः १०८

श्रीमच्छङ्करभगवत्पादाचार्यस्वामिने नमः

# श्रीमज्जगद्गुरुशङ्कराचार्याणामारतिः

जय भगवन् जय शङ्कर विद्याकल्पतरो ।
निर्मथितश्रुतिसागर जय जय भुवनगुरो ॥ जय देव जय देव ॥

धर्मस्थापनहेतोर्लीलातनुधारिन्
लोकानुग्रहहेतोर्ब्रह्मणि सन्न्यासिन् ।
कल्युद्भवनानाविधपाखण्डध्वंसिन्
अद्वैतामृतवृष्ट्या जडजीवोद्धारिन् ॥ १ ॥

श्रुतिशिरसस्तत्त्वानामेकस्त्वं वेत्ता
परपक्षाणां पविरिव विदितस्त्वं भेत्ता ।
संशीतेर्युक्तिबलादेकस्त्वं छेत्ता
त्वद्भाष्यामृतपुष्टः को नु जनः खेत्ता ॥ २ ॥

शारदयापि नुतं त्वां स्तोतुमलं कोऽहम्
मर्षय मे त्वसमञ्जसमक्षरसन्दोहम् ।
स्पर्शमणे स्वर्णीकुरु मां मलिनं लोहम्
स्थित्वा मे हृद्यनिशं वारय मम मोहम् ॥ ३ ॥

त्वच्चरितानुध्यानादाचारे शुद्धिम्

त्वद्भाष्यश्रवणादप्यनघामिह बुद्धिम् ।

विन्देम त्वन्मार्गाश्रयणात् पुण्यर्द्धिम्

देहि गुरो करुणाघन निःश्रेयससिद्धिम् ॥ ४ ॥

# मङ्गलम्

मङ्गळं गुरु श्री चन्द्रमौळीश्वरगे ।
शक्तिगणपति शारदाम्बेगे शङ्कराचार्यरिगे ॥ प ॥

कालभैरवगे काळि दुर्गिगे ।
वीर धीर शूर हनुम मारुति चरणक्के ॥ १ ॥

मल्लिकार्जुनगे चेल्व जनार्दनगे ।
अम्बाभवानि कम्बद् गणपति चण्डिचामुण्डिगे ॥ २ ॥

विद्यारण्यरिगे विद्याशङ्करगे ।
वागीश्वरिगे वज्रदेह गरुडाञ्जनेयरिगे ॥ ३ ॥

तुङ्गभद्रेगे शृङ्गनिवासिनिगे ।
शृङ्गेरिपुरदोळु नेलेसिरुवन्थ शारदाम्बेगे ॥ ४ ॥

सच्चिदानन्द शिव अभिनव नृसिंहभारतिगे
चन्द्रशेखरभारती गुरु सार्वभौमरिगे
चन्द्रशेखरभारती गुरु विद्यातीर्थरिगे
चन्द्रशेखरभारती गुरु भारतीतीर्थरिगे
चन्द्रशेखरभारती विधुशेखरभारतिगे ॥ ५ ॥